# श्रीमद् भागवत रसिक कुटुंब

## श्री महालक्ष्मी स्तवः

### नारायण उवाच

देवि त्वां स्तोतुमिच्छामि न क्षमाः स्तोतुमीश्वराः ।
बुद्धेरगोचरां सूक्ष्मां तेजोरूपां सनातनीम् ।
अत्यनिर्वचनीयां च को वा निर्वक्तुमीश्वरः ।।1।।

स्वेच्छामयीं निराकारां भक्तानुग्रहविग्रहाम् ।
स्तौमि वाङ्मनसो पारां किं वाऽहं जगदम्बिके।।2।।

परां चतुर्णां वेदानां पारबीजं भवार्णवे ।
सर्वशस्याधिदेवीं च सर्वासामपि सम्पदाम् ।।3।।

योगिनां चैव योगानां ज्ञानानां ज्ञानिनां तथा ।
वेदानां च वेदविदां जननीं वर्णयामि किम्।।4।।

यया विना जगत् सर्वमवस्तु निष्फलं ध्रुवम् ।
यथा स्तनान्धबालानां विना मात्रासुखं भवेत् ।। 5 ।।

प्रसीद जगतां माता रक्षास्मानतिकातरान् ।
वयं त्वच्चरणाम्भोजे प्रपन्नाः शरणं गताः ।। 6 ।।

नमः शक्तिस्वरूपायै जगन्मात्रे नमो नमः ।
ज्ञानदायै बुद्धिदायै सर्वदायै नमो नमः ।।7।।

हरिभक्तिप्रदायिन्यै मुक्तिदायै नमो नमः।
सर्वज्ञायै सर्वदायै महालक्ष्म्यै नमो नमः ।। 8।।

कुपुत्राः कुत्रचित् सन्ति न कुत्रचित् कुमातरः।
कुत्र माता पुत्रदोषे तं विहाय च गच्छति।।9।।

हे मातर्दर्शनं देहि स्तनान्धान् बालकानिव ।
कृपां कुरु कृपासिन्धुप्रियेऽस्मान् भक्तवत्सले ।।10।।

इत्येवं कथितं वत्स पद्मायाश्च शुभावहम् ।
सुखदं मोक्षदं सारं शुभदं सम्पदःप्रदम् ।।11।।

इदं स्तोत्रं महापुण्यं पूजाकाले च यः पठेत् ।
महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ।। 12 ।।

इत्युक्त्वा श्रीहरिस्तं च तत्रैवान्तरधीयत ।
देवो जगाम क्षीरोदं सुरैः सार्द्धं तदाज्ञया ।। 13।।

इति श्रीब्रह्मवैवर्त्ते महापुराणे तृतीये गणपतिखण्डे नारदनारायणसंवादे
लक्ष्मीस्तवकथनं नाम द्वाविंशतितमोऽध्यायः ।।